सोमाहुतिर्भार्गवः। अग्निः। त्रिष्टुप्

**हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम्।**

**मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः॥ २.००४.०१**

मित्र इव- सखेव। यः। जातवेदाः। देवः। आदेवे जने- देवपर्यन्तजने। दिधिषाय्यः- धारकः। भूत्- भवति। तम्। सुद्योत्मानम्- शोभनदीप्तम्। सुवृक्तिम्- सुष्ठु रक्षसां वर्जयितारम्। विशाम्- प्रजानाम्। अतिथिम्। सुप्रयसम्- शोभनान्नम्। अग्निम्- पावकं सर्वभूतहितक्रतुम्। वः- युष्मदर्थम्। हुवे- आह्वये ॥१॥

**इमं विधन्तो अपां सधस्थे द्वितादधुर्भृगवो विक्ष्वा३योः।**

**एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः॥ २.००४.०२**

इमम्- एनमग्निम्। विधन्तः- परिचरन्तः। अपाम्- मूलशक्तिधाराणाम्। सदस्थे- सदने। आयोः- यजमानस्य। विक्षु- प्रजासु। भृगवः- तेजस्विन उपासकाः। भृक् ज्वाला। तया सहोत्पन्ना भृगव इति शब्दकल्पद्रुमे। द्विता- द्विधा अभ्युदये निःश्रेयसे च। अदधुः- धृतवन्तः। देवानाम्- द्योतनशक्तीनाम्। अरतिः- ईश्वरः। अग्निः। जीराश्वः- क्षिप्रप्राणः। एषः- अयमग्निः। भूम- स्वविस्तारेण। विश्वानि- सर्वाणि। अभि अस्तु- व्याप्नोतु ॥२॥

**अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम्।**

**स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ॥ २.००४.०३**

क्षेष्यन्तः- गतिमन्तः। मित्रं न- सखायमिव। देवासः- देवाः। अग्निम्- पावकं सर्वभूतहितक्रतुम्। प्रियम्। मानुषीषु विक्षु- मनुष्यप्रजासु। धुः- स्थापितवन्तः। सः- असावग्निः। दक्षाय्यः- समर्थः।

Dr.Rangaji

WEBOLIM

दास्वते- दात्रे। दमे- तस्य सदने। आ- आभिमुख्येन। उशतीः- कामयमानाः। ऊर्म्याः- अपो मूलशक्तिधाराः। आ दीदयत्- उद्दीपितवान्॥३॥

**अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः।**

**वि यो भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान्॥ २.००४.०४**

अस्य- एतस्याग्नेः। पुष्टिः। स्वस्येव- आत्मन इव। आत्मेव शेव इति श्रुतेरग्नेः सर्वभूतहितक्रतोरात्मौपम्यम्। रण्वा- रमणीया। अथवायमनन्वयालंकारः। अस्य- एतस्य। हियानस्य- समृद्धिं गच्छतः। दक्षोः- दाहकस्य। संदृष्टिः- सन्दर्शनमपि पुष्टम्। यः। ओषधीषु- वीरुत्सु भौमभोगेषु। जिह्वा- ज्वालाम्। वि- विसृजन्। भरिभ्रत्- क्रीडति। रथ्यः- रंहणशीलः। अत्यः- अश्वः। वारान्- स्ववालान्। दोधवीति न- कम्पयतीव।॥४॥

**आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम्।**

**स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत्॥ २.००४.०५**

मे- मम। यत्। अभ्वम्- अग्न्याख्यं महत्त्वम्। वनदः- सम्भक्तारः। आ- आभिमुख्येन। पनन्त- स्तुवन्ति। उशिग्भ्यः- कामयमानेभ्यः। वर्णं- रूपम्। नामिमीत- प्रकटयति च। सः। चित्रेण- विचित्रेणासाधारणेन। भासा- प्रकाशेन। रंसु- रमणीयासु भावनासु। चिकिते- प्रज्ञायते। यः। जुजुर्वान्- जीर्णो भूत्वा। मुहुः- पुनः। युवा- अभिनवः। आ भूत्- भवति॥५॥

**आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत्।**

**कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः॥ २.००४.०६**

यः। वना- वनानि भौमभोगान्। ततृषाणो न- तृष्णायुक्त इव। आ भाति- भासयति दहति। पथा- प्रवणमार्गेण। वार्ण- उदकमिव सरति। रथ्येव- रंहणशीलोश्व इव। स्वानीत्- शब्दं करोति। कृष्णाध्वा- धूमादिमार्गगः। तपुः- अर्चिरादिमार्गगः। रण्वः- रमणीयः। चिकेत- ज्ञायते।

Dr. Rangaji

WEBOLIM

नभोभिः- ग्रहनक्षत्रान्तरभूतावकाशविशेषैः। स्मयमानः- प्रकाशमानः। द्यौरिव- नभ इव। चित्ताकाशप्रणालीविशिष्टचिदाकाश इव भाति ॥६॥

**स यो व्यस्था॑द॒भि दक्ष॑दु॒र्वीं प॒शुर्नैति॑ स्व॒युरगो॑पाः।**

**अ॒ग्निः शो॒चिष्माँ॑ अत॒सान्यु॒ष्णन्कृ॒ष्णव्य॑थिरस्वदय॒न्न भूम॑॥ २.००४.०७**

यः। सः। व्यस्थात्- अधितिष्ठति। उर्वीं- विस्तारभावनायाम्। अभि दक्षत्- प्रवर्धमानो भवति। स्वयुः- आत्मयोगयुक्तः। अगोपाः- स्वराट्। पशुः- क्रान्तदर्शी। पश्यतीति पशुरिति यास्कः। नैति- इव सरति। अग्निः- पावकः सर्वभूतरत्युद्भूतसङ्कल्प इत्याध्यात्मिके। शोचिष्मान्- दीप्तः। अस्वदयन्न- आस्वादयन्निव। अतसान्- तरून् भौमभोगान्। उष्णन्- तापयन्। कृष्णव्यथिः- अर्चिरादिगमनार्थं धूमादिमार्गतापकः। भूम- स्वविस्तारेण भवति ॥७॥

**नू ते॒ पूर्व॒स्याव॑सो॒ अधी॑तौ तृ॒तीये॑ वि॒दथे॒ मन्म॑ शंसि।**

**अ॒स्मे अ॑ग्ने सं॒यद्वी॑रं बृ॒हन्तं॑ क्षु॒मन्तं॒ वाजं॑ स्वप॒त्यं र॒यिं दाः॑॥ २.००४.०८**

नु- क्षिप्रम्। ते- तव। पूर्वस्य- सनातन्याः। अवसः- कान्त्याः। अधीतौ- ध्याने। तृतीये विदथे- त्रिदिवसम्बन्ध्युपासने। मन्म- मननम्। शंसि- भवते प्रशंसितम्। अग्ने- पावक सर्वभूतहितक्रतो। अस्मे- एतस्मै। संयद्वीरम्- नियमितवीर्यम्। बृहन्तम्- महत्। क्षुमन्तम्- मन्त्रयुक्तम्। वाजम्- गतिशीलम्। स्वपत्यम्- शोभनसन्ततिसम्पन्नम्। रयिम्- दानयोग्यधनम्। दाः- देहि ॥८॥

**त्वया॒ यथा॑ गृत्सम॒दासो॑ अग्ने॒ गुहा॑ व॒न्वन्त॒ उप॑राँ अ॒भि ष्युः।**

**सु॒वीरा॑सो अभिमाति॒षाहः॒ स्मत्सू॒रिभ्यो॑ गृण॒ते तद्वयो॑ धाः॥ २.००४.०९**

अग्ने- पावक सर्वभूतहितक्रतो। सुवीरासः- शोभनवीर्यसम्पन्नाः। अभिमातिषाहः- अहङ्कारबाधकाः। त्वया- भवता। यथा। गृत्समदासः- ज्ञानानन्दमया उपासकाः। गुहा- हृदयगुहायाम्। उपरान्- स्थिता रमणीयभावनाः। अभि ष्युः- व्याप्नुवन्ति। वन्वन्तः- भजन्तः।

Dr. Rangaji

WEBOLIM

तथा। सूरिभ्यः- विद्वद्भ्यः। गृणते- स्तुवते। तत्। स्मत्- प्रशस्तम्। वयः- अन्नम्। धाः- धारय ॥९॥

Dr. Ranganji

WEBOLIM